Shri Raghunatha Temple MSS. Library,
५८६२ JAMMU

No. १४०२ / क

Title बटुक दीपदान पद्धतिः

Author

Extent ५ पत्र Age

Subject तन्त्र


श्री रणवीर पुस्तकालय
मंदिर श्रीरघुनाथ जी
नं. सं. ५५
१४०२

नं. ३५४

पूर्वे ऐं ह्रीं श्रीं कालभैरवाय नमः । आग्नेये ऐं ह्रीं श्रीं रुरुभैरवाय नमः । दक्षि
णे ऐं ह्रीं श्रीं चण्डभैरवाय नमः । नैरृते ऐं ह्रीं श्रीं क्रोधभैरवाय नमः । प
श्चिमे ऐं ह्रीं श्रीं उन्मत्तभैरवाय नमः । वायव्ये ऐं ह्रीं श्रीं कपालभैरवा
य नमः । उत्तरे ऐं ह्रीं श्रीं भीषणभैरवाय नमः । ईशाने ऐं ह्रीं श्रीं संहार
भैरवाय नमः । ऊर्ध्वे ऐं ह्रीं श्रीं विधातृभैरवाय नमः । इति दशमावर
णे ऐं ह्रीं श्रीं क्षेत्रपालभैरवाय नमः । ऐं ह्रीं श्रीं महाभैरवाय नमः । ऐं ह्रीं
श्रीं सिद्धनाथभैरवाय नमः । ऐं ह्रीं श्रीं सिद्धयोगीश्वरभैरवाय नमः । ऐं
ह्रीं श्रीं परमभैरवाय नमः । ऐं ह्रीं श्रीं सत्वादिस्वरूपाय नमः । मध्ये ऐं ह्रीं
श्रीं बटुकभैरवाय नमः । इत्येकादशमावरणे श्रीबटुकाय चंदनं
पुष्पं धूपं दीपं नैवेद्यं फलं मत्स्यं ताम्बूलं मारात्रिकं पूजान्ते बलिदा
नं अथ बलिदानं तत्र बलिर्द्विविधः सात्विकराजसश्चेति ब्राह्मणे
नियतः शुद्धः सात्विकः पायसान्नादिहुताशनमेकेन जातीयं ब
लिद्रव्यकं त्रिमधुरं च घृतशर्करामधुराणि मोदकानि माषव
टकानि अपूपैरन्यैर्विविधभक्ष्यद्रव्यैर्बलिर्देयः ॥ नैमित्तके काम्ये
च राजसो बलिर्देयः दिवसे प्रत्यहं की पूजां नित्यबलिद्रव्यं संपाद्य

अधः

रात्रौबलिंदद्यात् शुद्धासनेउपविश्याऽचम्य मूलेनप्राणायम्य
देशकालौसंकीर्त्यामुकफलावाप्तये श्रीवटुकभैरवप्रीतये ब
लिदानमहंकरिष्येइतिसंकल्पः ॥ आदौविघ्नेशदुर्गौवि यथावत्सं
पूज्य पूर्वोक्तप्रकारेण रक्तचंदनरक्तपुष्पाक्षतैर्नानोपहारैः
सावरणंदेवमभ्यर्च्य ॥ दीपाग्रे त्रिकोणंचतुरस्रंवामंडलंकृत्वा
तस्मिन्स्वर्णादिपात्रस्थंकबालाकारसंपादितंबलिंनिधायनमः
इतिबलिंसंपूज्य हस्तेजलमादाय मूलमुच्चार्य श्रीवटुकभैरव
इमंबलिंगृह्णगृह्णस्वाहा इत्युच्चार्यजलंभूमौनिक्षिप्य स्वहस्ते
जलंदेवंभजेप्रवरदेप्रसंध्यायन्यथाशक्त्यामूलंजपेत् अशक्तो
वटकादिनाबलिंदत्वा स्तोत्रपाठादिकार्यं बलिदानेनवांछि
तंसिद्ध्यति राजसबलिदानविधिरप्येवमेवसात्विकंबलिद्रव्यंसा
त्विकध्याने राजसबलिदानविषयोन्यतोऽवगंतव्यः इतिपूजांते
बलिदानविधिः दीपमंत्रेणदीपप्रार्थना ॐह्रींश्रींक्लींह्रींश्रींस
र्वाग्न्यायप्रचंडपराक्रमायवटुकायइमंदीपंगृहाणममसर्वका
र्याणिसाधय २ दुष्टान्नाशय २ त्रासय २ सर्वतोममरक्षांकुरु २ हुं

३ ॐ आं ह्रीं वटुकाय विद्महे

फट् स्वाहा। इति दीपमन्त्रेण दीपप्रार्थना॥ मम सन्तोषो भव मम का
र्यं कुरु २ ईप्सितं देहि २ मम सर्वविघ्नान् नाशय २ स्वाहा। ततो भैरव
गायत्रीजपः ॐ तत्पुरुषाय विद्महे आपदुद्धारणाय धीमहि त
न्नो वटुकः प्रचोदयात्। इति वटुकगायत्री। ततः कवचमन्त्रस्त
वराजेन वा कवचं जपेत् संपुटेन ह्रौं ह्स्कलरीं ह्सौं वटुकभै
रव कुरु स्वस्त्ययनमहामन्त्रः। वा आपदुद्धारकमन्त्रं जपेत्। इत्युड्डा
मरतन्त्रे श्रीवटुकभैरवदीपपात्रक्रमः समाप्तिमगात्॥ श्मशा
नभैरवी रुधिरान्नसा भक्तिग्राही सिद्धिं मे देहि २ मम मनोरथान् पूर
य हुं फट् स्वाहा। इति श्रीउग्रपोत्तमपादाब्जैः श्रीब्रह्मार्पणमौ
क्तिना क्रियते रामचन्द्रेण दीपदानविधिक्रमः॥ तत्र शुद्धकालः
वैशाखश्रावणकार्तिकः पञ्चके शुद्धपक्षे प्रकर्तव्यो यावत्का
लास्य पञ्चमी रविचन्द्रगुरुसौम्यभृगुवाराः शुभप्रदाः स्वाती उत्त
विशाखा [illegible] श्विनी रोहिणी श्रवणोत्तरात्रयज्येष्ठे दीपदाने शुभप्र
दा पञ्चमी सप्तमी चैव द्वितीया प्रतिपत् तथा सौभाग्यशोभनायु
ष्मान् कर्मा धृति प्रीतिके वृद्धिवैधृतियतिपते योगाः शुभाः स्मृ
ताः॥ गरवालवकौलवसदैवं शुभं स्मृतः ग्रीष्मवर्जं शुभास्तेप

2

रिकीर्त्तिताः मासद्वयात्मकं श्रेष्ठं दिने चैव दिनार्द्धकं सूर्योदयस
मारभ्य यावदस्तंगते रवौ अहोरात्रप्रमाणेन ग्रीष्मादिपरिकीर्त्ति
ता मासद्वयात्मकं श्रेष्ठं दिने चैव दिनार्द्धके दिवा पूर्वाह्णिकाका
ले मध्यरात्रे निशि तथा तदभावे सर्वस्मिन्नेव सूर्येचन्द्रोपराग
योः अर्द्धोदयमहाष्टम्यां कालमाक्रम्य रात्रिके इति कालविचा
रः अथ पात्रविचारः स्वर्णे सिद्धिदं पात्रं वश्ये रौप्यप्रकल्पि
तं विद्वेषणकर्मे लोहं मारणे मन्मथं तथा १ उच्चाटनकर्मे कां
स्यं मोहे च पैत्तलं स्मृतं अत्रोक्तं सर्वकामेषु सर्वभावे तु ताम्रकं
श्वेतं शान्तौ स्तम्भे तु पीतं वश्ये माञ्जिष्ठरक्तकं विद्वेषे कर्द्दमं प्रोक्तं
मारणे कृष्णसूत्रकं सर्वभावे प्रकर्त्तव्यं श्वेतं तत्र प्रशस्यते एका
वर्त्तिः श्वेतः सप्तएकविंशति संख्यया अष्टम्यां च प्रकर्त्तव्या अष्टम्या
नेव तु कारयेत् वर्त्तिका प्रकर्त्तव्या नित्या बहुतन्तवस्तथा गोघृ
ते सर्वसिद्धिः स्यात् माहिषं मारणे स्मृतं उष्ट्रं विद्वेषणे प्रोक्तं गोघृ
तं शान्तिकं भवेत् अजा उच्चाटनकरे सर्वाभावे च गोघृतं घृताभावे
तु तैलं स्यात् तिलतैलं विशेषतः घृतेन दीपदाने तु तिलतैलेन
वाथवा रसमेदोद्भवं तैलं प्रयत्नेन विवर्जयेत् दीपमन्त्रं च पिंड

चतुर्दशाङ्गुलिष्टेन प्रथपात्रमाने विंशत्यपलद्वन्द्वे एवंवश्येचैवा
दिकर्मणि त्रिंशत्पलमितेपात्रेसातेतद्वत्प्रकीर्तितं षष्टिपल
मितेपात्रेऽधोक्काहेनवांगुले षडंगुलानिचत्वविंशद्व्यायामेपरि
कीर्तिता पंचशतमितेतैलेसर्वशत्रुविनाशने द्विपंचाशन्मि
तेपात्रेऽधोक्काहेतषष्टिवत् शतपलमितेतैलेदीपात्शत्रु
विनाशने शतपलमितेपात्रेऽक्काहेद्वादशांगुले द्वाविंशद्वे
वव्यायामेतन्मध्येतसहस्रकं सर्वकर्मस्यसिद्धिःस्याद्दीपेपल
सहस्रके पंचदशांगुलोक्काहेव्यायामेचषड्विंशके प्रयुतपल
दीपेचविगडाहेधमुच्यते सहस्रपलकृतेदीपेवंयमोत्तप्रजा
यते त्रिंशत्पलमितेपात्रेप्रमानेचैवपूर्ववत् त्रिंशत्पलमितेते
लेदीपान्येकोनविंशति कन्याभिकांक्षितेतैलेप्रत्यहंदीपमाच वि
रेत् ईप्सितांचलभेत्कन्यांभैरवस्यप्रसादतः षोडशपलमिते।
पात्रेऽक्काहेचदशांगुले विंशत्पलेकृतेदीपेप्रत्यहंविंशतीदि
ने सर्वरोगप्रणाशायज्ञयापस्मारकष्टवान् दशपलमितेऽ पात्रे
धोक्काहेतत्रिंशवत् दशपलमितेतैलेप्रत्यहंसपूर्यवासरं रा
जवश्यकरंत्वंप्रयदिसात्त्वाद्वाक्यतिभवेत् त्रिंशत्पलमितेपा।
त्रेऽधोक्काहेतपूर्ववत् त्रिंशत्पलघृतेतैलेत्वद्वरोगविनाशने

3

एकादशपलमितेपात्रेउष्टाहेतद्घंडेशुले ॥ पंचविंशत्पलैतैलै
दीपाद्भुतादिनाशने । एकादशपलेपात्रेद्वीष्टाहेन्नपूर्ववत् ।
षोडशपलेकृतेपात्रे । ग्रहपीडानिवारणे । शतपलमितेपात्रेद्वे
ष्टाहेत्तषोडश व्यायामेत्तभवेत्सार्द्धंचत्तविंशतिरेशुलेः । तन्म
ध्येत्तश्वकर्तेष्ठोदीपः शतश्वयःस्मृतः । सिंहव्याघ्रादिसर्पाणां
भयंनैवप्रजायते । एकादशपलेपात्रेउष्टाहेचैवपूर्ववत् ष
ष्टपलेहृतैर्दीपोयात्राकालेत्तकारयेत् । तस्मामेर्भयंनालि
खेछयाष्टहमाभुयात् । त्रिंशत्पलमितेपात्रेव्यायामेचैवपूर्व
वत् । शतपलमितैस्तैलैमेधारोग्यविवर्धने । नित्यदीपप्रमाणं
तपात्रेपलत्रयंस्मृतं । द्वयोष्टाहेभवेत्सार्थमंत्रोदरमध्यगः
तन्मध्येत्तभवेत्तैलेपलमात्रेपलार्द्धके । तत्रदीपेत्तश्रज्वाल्यका
मनापूरतःसुधी । षंत्रोदरचत्वारोव्यायामेपरिकीर्तिता ए
कावर्तिश्चकर्तव्याएकविंशतितंतुभिः पात्रमध्येभवेत्साथा
षट्कोणंतत्त्रिकोणकं श्यापयेत्पात्रमध्येत्तरक्तचंदनतोलि ।
खेत् तन्मध्येचभवेत्हृत्तिन्यासपूर्वंबलिंददेत् आवरणानि
ततःकुर्यादेकादशचसंख्यया दिक्पालांलोकपालांश्च स
मंत्रपरिकीर्तिताः सवाहनांसायुधांश्च पत्निश्चवादिभिर्युः ।



तान् अपसर्पेण पूर्वं हि ततः सर्वत्र पूजयेत् ततः पंचोपचारैस्तु व
टुकं प्रति पूजयेत् धूपदीपादिनैवेद्यैस्तांबूलारार्तिकादिभिः प्र
दक्षिणं नमस्कारैस्समर्प्य बलिपूर्ववत् जपादौ च जपांते च बलि
दानं शुभं प्रदा वटुकेन च मंत्रेण अष्टभैरवतो बलिं शत्रुपक्ष
स्य रुधिरं पोशारी च दिने दिने भक्तंयस्त्वगणैः सार्द्धं सारमेयस
मन्वितं बलिमंत्रोय माख्याताः सर्वेषां विजयप्रदः अनेन बलि
नाहृष्टः वटुकः परिसैन्यकं सर्वगणेभ्यो विभजेद्दामिषं क्रुद्धचे
तसे एवं हते शत्रुबलं क्षीयते नात्र संशयः अर्जुने हत्तुमानं च
दश विद्यां वटुकं रवि पद्मावती च वर्णी च श्मशानभैरवीं तथा
कूटस्थां च महाविद्यां न्रसिंहश्चैव षोडशी त्रिदशाश्चक्षराणां च
तथैव दशपंचकं चंडीमंत्रेषु सर्वेषु गणेशेषु तथैव च एते देव
प्रिया देवी कलौ सर्वार्थदायकाः अतः परं प्रवक्ष्यामि सिद्धकाम
स्य साधके अनायासेन देवेशि देवता हि प्रसीदति मंत्रमात्रेण
देवेशि कृते च बहुसिद्धिदाः कवचेनैव मंत्रेण त्रेतायां सिद्धिदा
यकां स्तवराजे पठन्मंत्रे कवचे द्वापरे प्रिये कलौ च मंत्रकवचस
हस्त्रनामस्तवेषु नः पंजरे दीपमात्रेण सर्वसिद्धिप्रदायकं दीप

4

दानंप्रकुरुतेकामनापुरतःसुधीः दीपाग्रेप्रजपेत्सर्वंकवचं च।
तद्विशेषतः होमांतेचजपांतेचदीपान्तेचैवपार्वति साधकाया
निर्भाषतिनतद्वचनमन्यथा कवचःस्तवराजश्चदीपाग्रेप्रपठे
त्सुधीः ततोमंत्रजपंकुर्याद्देवतायैसमर्पयेत् यंयंचिंतयतेका
मंतंतंप्राप्नोतिसाधकः यदुत्तरपदेनैवसर्वपापक्षमस्तमे यंयं
चिंतयतेकामंतंतंप्राप्नोतिमानवः स्तवराजस्यतेनैवफलंप्रा
प्नोतिमानवाः स्तवराजसहस्रेणलभतेवांछितंफलं एकाद।
शसहस्रेणतस्यसिद्धिरनेकधा संपुटःस्तवराजेनमंत्रमष्टोत्त
रशतं पुरश्चरणकंकुर्यादेकादशसहस्रकं धनार्थीचसुता
र्थीचदारार्थीचापिमानवः रात्रौदीपंचप्रज्वाल्यस्तवराजस्यप
ठते कवचेसंपुटेनैवमंत्रराजेनवैपुनः कृष्णाष्टमींसमारभ्य
यावत्कृष्णाष्टमीभवेत् तावन्मंत्रंजपेद्रात्रौकार्यंशुद्धिश्चसाध
कः रात्रौचप्रथमेयामेतदूर्ध्वंरत्नीयावधि स्तवन्मंत्रंस्तवराजं
दीपाग्रेमासपूर्वकं मनसावचसाकायाएकाग्रेणैवकारयेत्
ससर्वांल्लभतेकामान्नात्रकार्याविचारणात् सूर्यास्तसमयार।
भ्ययावत्सूर्योदयोभवेत् तावन्मंत्रंभवेद्रात्रौकार्यंशुद्धिश्चमे

त्रवित् तस्य सर्वं प्रजायेत दीपमंत्रप्रभावतः अनेन दीपदाने
न यं यं कामं च कारयेत् तं कामं सिद्धिमाप्नोति भैरवस्य प्रसाद
तः इति श्रीवटुकदीपदानपद्धतिसमाप्तिमगात् ॥

5.